Sankatahara Chaturthi Puja

सङ्कटहरचतुर्थीपूजा

Document Information

Text title : Sankatahara Chaturthi Puja

File name : sankaTaharachaturthIpUjA.itx

Category : ganesha, pUjA

Location : doc_ganesha

Proofread by : Narendran Madathil

Description/comments : From Vighneshvara-stuti-manjari 4

Latest update : October 1, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 1, 2026

sanskritdocuments.org

सङ्कटहरचतुर्थीपूजा

सङ्कल्पः -शुक्लाम्बर + मासे कृष्णचतुर्थ्यां शुभतिथौ श्रीमहागणपति प्रीत्यर्थं सङ्कट (ष्ट)हरचतुर्थी पूजां यथाशक्ति करिष्ये । (कलशपूजादिकं सिद्धिविनायक पूजावत् ।)

ध्यानं -एकदन्तं महाकायं तप्तकाञ्चनसन्निभम् ।
लम्बोदरं विशालाक्षं वन्देऽहं गणनायकम् ॥

आखुपृष्ठसमासीनं चामरैर्वीजितं गणैः ।
शेषयज्ञोपवीतं च चिन्तयामि गजाननम् ॥

आवाहनं -आगच्छ देव देवेश सङ्कटं मे निवारय ।
यावत्पूजा समाप्येत तावत्त्वं सन्निधौ भव ॥

आसनं -गणाधीश नमस्तेऽस्तु सर्वसिद्धिप्रदायक ।
आसनं गृह्यतां देव सङ्कटं मे निवारय ॥

पाद्यं - उमापुत्र नमस्तेऽस्तु नमस्ते मोदकप्रिय ।
पाद्यं गृहाण देवेश सङ्कटं मे निवारय ॥

अर्घ्यं -लम्बोदर नमस्तेऽस्तु रत्नयुक्तं फलान्वितम् ।
अर्घ्यं गृहाण देवेश सङ्कटं मे निवारय ॥

आचमनीयं -गङ्गादिसर्वतीर्थेभ्यः आहृतं जलमुत्तमम् ।
गृहाणाचमनीयार्थं सङ्कटं मे निवारय ॥

स्नानं -पयोदधियुतं चैव शर्करामधुसंयुतम् ।
पञ्चामृतं गृहाणेदं सङ्कटं मे निवारय ॥

कबेरजासिन्धुगङ्गाकृष्णागोदोद्भवैर्जलैः ।
स्नापितोऽसि मया भक्त्या सङ्कटं मे निवारय ॥

वस्त्रं -इभवक्त्र नमस्तुभ्यं गृहाण परमेश्वर ।

वस्त्रयुग्मं गणाध्यक्ष सङ्कटं मे निवारय ॥

उपवीतं -विनायक नमस्तुभ्यं नमः परशुधारिणे ।
उपवीतं गृहाणेदं सङ्कटं मे निवारय ॥

गन्धाः -ईशपुत्र नमस्तुभ्यं नमो मूषिकवाहन ।
चन्दनं गृह्यतां देव सङ्कटं मे निवारय ॥

अक्षताः -घृतकुङ्कुम संयुक्ताः तण्डुलाः सुमनोहराः ।
अक्षतास्ते नमस्तुभ्यं सङ्कटं मे निवारय ॥

पुष्पाणि -चम्पकं मल्लिकां दूर्वाः पुष्पजातीरनेकशः ।
गृहाण त्वं गणाध्यक्ष सङ्कटं मे निवारय ॥

ॐ .... नमः ।
सुमुखाय ।
एकदन्ताय ।
कपिलाय ।
गजकर्णकाय ।
लम्बोदराय ।
विकटाय ।
विघ्नराजाय ।
विनायकाय ।
धूमकेतवे ।
गणाध्यक्षाय ।
फालचन्द्राय ।
गजाननाय ।
वक्रतुण्डाय ।
शूर्पकर्णाय ।
हेरम्बाय ।
स्कन्दपूर्वजाय ।
(दूर्वायुग्मैः अर्चनां कुर्यात्)
(ॐ .... नमः)
गणाधिपाय
उमापुत्राय

अघनाशनाय
एकदन्ताय
इभवक्राय
मूषिकवाहनाय
विनायकाय
ईशपुत्राय
सर्वसिद्धिप्रदाय
लम्बोदराय
वक्रतुण्डाय
मोदकप्रियाय
विघ्नविध्वंसकर्त्रे
विश्ववन्द्याय
अमरेशाय
गजकर्णकाय
नागयज्ञोपवीतिने
फालचन्द्राय
परशुधारिणे
विघ्नाधिपाय
विद्याप्रदाय (२१)
धूपः -लम्बोदर महाकाय धूम्रकेतो सुवासितम् ।
धूपं गृहाण देवेश सङ्कटं मे निवारय ॥

दीपं -विघ्नान्धकारसंहारकारक त्रिदशाधिप ।
दीपं गृहाण देवेश सङ्कटं मे निवारय ॥

नैवेद्यं -मोदकापूपलड्डुकपायसं शर्करान्वितम् ।
पक्वान्नं सघृतं देव नैवेद्यं प्रतिगृह्यताम् ॥

फलानि -नारिकेलफलं द्राक्षा रसालं दाडिमं शुभम् ।
फलं गृहाण देवेश सङ्कटं मे निवारय ॥

ताम्बूलं -क्रमुकैलालवङ्गानि नागवल्लीदलानि च ।
ताम्बूलं गृह्यतां देव सङ्कटं मे निवारय ॥

नीराजनं -कर्पूरानलसंयुक्तं अशेषाघौघनाशनम् ।

नीराजनं गृहाणेश सङ्कटान्मां विमोचय ॥

पुष्पाञ्जलिः -चम्पकाशोकवकुल पारिजात भवैः सुमैः ।
पुष्पाञ्जलिं गृहाणेमं सङ्कटान्मां विमोचय ॥

स्तुतिः-त्वमेव विश्वं सृजसीभवक्त्र त्वमेव विश्वं परिपासि देव ।
त्वमेव विश्वं हरसेऽखिलेश त्वमेव विश्वात्मक आविभासि ॥ २६२
नमामि देवं गणनाथमीशं विघ्नेश्वरं विघ्नविनाशदक्षम् ।
भक्तार्तिहं भक्तविमोक्षदक्षं विद्याप्रदं वेदनिदानमाद्यम् ॥

ये त्वामसम्पूज्य गणेश नूनं वाञ्छन्ति मूढाः विहितार्थसिद्धिम् ।
त एव नष्टा नियतं हि लोके ज्ञातो मया ते सकलः प्रभावः ॥

औं नमो हेरम्ब मदमोदित मम सङ्कटं निवारय स्वाहा इति २१ वारं जप्त्वा
पुनः दूर्वया एकविंशतिनामभिः अर्चेत् ।
अर्घ्यं -तिथीनामुत्तमे देवि गणेशप्रियवल्लभे ।
सङ्कटं हर मे देवि गृहाणार्घ्यं नमोऽस्तु ते ॥

चतुर्थी तिथिदेवतायै इदमर्घ्यम् । (सप्तवारं)
लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय ।
सङ्कटं हर मे देव गृहाणार्घ्यं नमोऽस्तु ते ॥

सङ्कटहर विघ्नेशाय नमः इदमर्घ्यम् । (सप्तवारं)
क्षीरोदार्णवसम्भूत अत्रिगोत्रसमुद्भव ।
गृहाणार्घ्यं मया दत्तं रोहिणीसहितः शशिन् ॥

चन्द्राय नमः इदमर्घ्यम् । (सप्तवारमर्घ्यं दद्यात् ।)
समर्पणं इदं सङ्कटहरचतुर्थीपूजात्मकं कर्म महागणपत्यर्पणमस्तु ॥

इति सङ्कटहरचतुर्थीपूजा सम्पूर्णा ।

Proofread by Narendran Madathil

Sankatahara Chaturthi Puja

pdf was typeset on October 1, 2026

Please send corrections to *sanskrit@cheerful.com*